International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# रामायणे नारी

**मंगला चरणम्**

रामाय रामचन्द्राय रामभद्राय वेधसे
रघुनाथाय नाथाय सीतायाः पतयेनमः ।

**शीर्षकः "रामायणे नारी" मम शोधपत्रमैतिहासिकं वर्णनात्मकं च शैलिना लिखितम् ।**

उपक्रमः- संपूर्णे रामायणे सप्तकाण्डाः सन्ति । आदय कांड़ः, वालकाण्डः इति कथ्यते । वालकाण्डे द्वितीये सर्गे क्रौञ्चवधसमये वाल्मीकिं ब्रह्मा उपदेशं दत्तवान् । यत्- त्वया क्रोञ्चवधवेलायां निसृतावाणीमाधारिकृत्य रम्या रामायणीकथा लिखतु इति उपदेशं दत्तवान् । अतः वाल्मीकिः वालकाण्डस्य द्वितीय सर्गे एव १५ श्लोके क्रौञ्चवधः वाणीनिसृता । यथा-

मानिषाद प्रतिष्ठां त्वमगमसाश्वतीसमाः
यत् क्रौञ्चमिथुना देकमवधिः काममोहितम् । (रामा-वालकाण्ड-२य सर्ग-१५ श्लो)

श्लोकाऽयं रामायणस्यादय श्लोक त्वेन परिगण्यते । ब्रह्मा उक्तवान् भो महर्षि भवता अस्मात् रामायणीकथा प्रारभतु । रामयणे नारीं वहु मर्यादावती आसीत् । यथा रामस्य-सीता । अविवाहित कन्यायाः उदाहरणमस्ति । यथा एका शवरी आसीत् सा तस्याः आजीवनं । श्रीरामस्य वनगमनं प्रति अपेक्षायमाणा आसीत् । सा रामलक्ष्मणसीतानां कृते अतिथि सत्कारं कृतवती । रामः तदनन्तरम् उक्तवान्-

कच्चित्ते निर्जिताविघ्नाः, कच्चित्ते वर्द्धते तपः ।
कच्चित्ते नियतः क्रोधः आहारश्चतपोधने ॥
कच्चित्ते नियमाः प्राप्ताः कच्चित्तेमनसः सुखम् ।
कच्चित्ते गुरुशुश्रुषा सफला चारुभाषिणी ॥ (रामायणः ३.७४, ८-९)

देवी शबरी! त्वं विघ्नोपरि विजयं प्राप्नोति स्म । तपस्या अनुदिनं वर्द्धते वा? भवती क्रोधोपरि विजयं प्राप्तवती वा? तथाहारं नियमितं स्वीकरोति वा? भवती सफलता पूर्वकं नियमानां पालनं करोति वा? त्व मनः सदाप्रसन्नं भवति वा? भो सुभाषिणि तव गुरुसेवा सफलता पूर्वकं संपन्नं भवति वा?

शवरी श्रीरामचन्द्रं देहत्यागाय अनुमति दत्तवान् । स्वयंप्रभा अन्या एका तपस्विनी आसीत् । सा हनुमान् तथा वानरैः साकं सार्वान् भोजयति स्म । सा एका गुहायां तिष्ठति स्म । तथा तत्र तपस्या कृतवती । (४, ५१, च, ५२ सर्गे)

कन्या दूषणं रामायणे अतीव महान् अपराध रूपेण गृह्यते स्म । राजा दन्डं शुक्राचार्यस्य पुत्रि अरजांवत्म पूर्वकं इच्छाविरुद्देन धर्षणं कृतवान् । अतः शुक्राचार्यः तं राजानं कठोर शापं दत्तवान् (७, ८०, १६) राज्ये तदा कन्याः शुभं मन्यते स्म । श्रीरामस्य राज्यभिषेक समये कन्याः उपस्थितासन् । यदा श्रीरामः रथारुढ़ोभूत्वा आगतवेलायामन्यैः जनैः साकं कन्यारपि आगच्छन्ति स्म ।

अक्षतं जातरूपं च गावः कन्याः सहद्विजाः
नरामोदकः हस्ताच रामस्य पुरतोययुः । (युद्ध-१२८, ३८)

श्रीरामचन्द्रैः साकमग्रे सुवर्णयुक्तः पात्रः गोब्राह्मण कन्याः तथा हस्तैः मिष्टान्नं नीत्वा अनेकानेकमनुष्याः गमनं कुर्वन्ति स्म ।

रामायणयुगे विवाहस्य स्वयंवरं प्रथा एकासीत् । कैकेसी पित्रासौ मालिना आदिष्टा उक्तवान् । (उत्तर-९:११)

सात्वं मुनिवरं श्रेष्ठं प्रजापति कुलोद्भवम् ।

भजविश्रवसं पुत्रि पौलस्त्यं वच्य स्वयम् । (उत्तर-९:११)

स्वयम्बरे विश्वमित्रेण- रामचन्द्रः शिवधनुः वभंज । अतः सीता श्रीरामंवरया-मास । जनकः तस्य तिस्त्रः कन्याः उर्मिलां-लक्ष्मणाय, भरत-मान्डवै, शत्रुघ्नं-श्रुतकीर्त्तये यथाक्रमं, रामस्य त्रिभ्यःभ्रात्रृभ्यः दत्तवान् ।

राक्षसमयः स्वकीयापुत्रिं मन्दोदरीं रावणाय दत्तवान् ।

इयं ममात्मजा राजन् हेमयाप्सरसा घृता ।

कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम् ॥ (उत्तर-१२, १८, १/२)

पुनः कन्यादानं भ्रात्राद्वाराऽपि यथा- रावणः भगिनिं सूर्पणखां दानवराजानं विद्युज्जिह्वां काल्काया: पुत्रासीत् ।

कन्यादानम् मात्रापि- संध्यानामक राक्षसी विधृत्केशे कृतवती । (७-४-२१)

वरवधोः अपेक्षितं गुणानि । सुन्दराकान्डे हनुमता कथ्यते यत् रामचन्द्रः परमसुन्दर रासीत् । (३५८, १५, २०)

राजनीत्यां विनीतश्च............वेदांगेषुच निष्ठितः (सुन्दरा-३५-१३-२४)

श्रीरामचन्द्रः राजनीतिषु शिक्षितः, ब्राह्मणानामुपासकः ज्ञानीशीलवान्, विनम्र तथा शत्रुणां सन्तापदाता, आसीत् यजुर्वेदस्य विद्वान्, वेदवेदांगेषु, तथा धनुर्विद्यासु अपि ज्ञाताऽऽसीत् ।

**रामायणे प्रमुखाः नार्यः**

१. कौशल्या, कैकेयी, सुमित्रा, ऋषिकत्नाया-अहल्या, अनसूया, सीता, अनार्य-नार्यः । मन्थरा, शबरी, राक्षस्यः, ताड़का, कैकसी, मन्दोदरी, राबणस्य अन्यस्त्रियाँ, सर मा । (बिभिषणस्य पत्नी), मालिनी, सूर्पणखा, कुम्भीनसी, सुरसा, अयोमुखी, सिंहिका, लंकिनी, अजामुखी, एकजटा-हरिजटा, प्रधसा, विकटा, दुर्भुदी, सीतायाः रक्षार्थं सर्वाः राक्षसिन्यः, विनता, विकटा, चंड़ोदरी, त्रिजटा, सरम् आदयः ।

**इतिशम्**

**डा. सुरेशः कुमारः पन्डाः द्वारा प्रस्तुतं शोधसारम् ।**

**डॉ. सुरेशः कुमारः पन्डा**

**प्राध्यापकः संस्कृतः विभागः**

**पञ्चायत उच्चमाध्यमिकः विद्यालयः**

**पलशागोरा, वौद्धः, पिन्-७६२०३०**

**नगर/पोः- शान्तिनगरपड़ा, बुढ़ीसमलाइप्लट्, सोनपुर**

**जिल्ला- सुवर्ण्णपुर, ओड़िशा, पिन्- ७६७०१७**

**मो- ९४३७७०६३८९/७९७८४६८३४१**

**ॐ**

**शीर्षकः रामायणेनारी**

**“रामाय रामचन्द्राय रामभद्राय वेधसे**

**रघुनाथाय नाथाय सीतायाः पतये नमः ॥”**

समग्ररामायणे सप्तकाण्डाः सन्ति । यथा- (१) बालकाण्डः, (२) अयोध्याकाण्डः, (३) अरण्यकाण्डः, (४) सुन्दराकाण्डः, (५) किष्किन्ध्याकाण्डः, (६) लंकाकाण्डः, (७) उत्तराकाण्डः । आद्यकाण्डे, वालकाण्डे नारदः महर्षिः संक्षेपेन रामायणकथां श्रावयति स्म । प्रथमे सर्गे । द्वितीय सर्गे बाल्मीकिः निषादम् अभिशापवाणीं श्रावितवान् । वालकाण्डस्य द्वितीयसर्गेव या अभिशापवाणीं श्रावितवान् तस्मादेव बाल्मीकीय रामायणस्य आद्यश्लोकत्वेन परिगण्यते ।

“मा निषाद ............................... काममोहितम् ।” (वाल-२य सर्ग १५ श्लोक)[१]

ब्रह्मणा बाल्मीकिः उक्तः यः श्लोक अयं रामकथातः प्रारब्धः । अतः अस्माद् श्लोकादेव रामायणः प्रारम्भं करोतु ।

**प्रथमः अध्यायः**

रामायणेनारी अतीव पवित्रा रूपेण जीवति स्म । यथा- श्रीरामस्य सीता ।

परन्तु कन्या दूषणे रामायणकाले एकः महान् अपराधरासीत् । तस्य भयंकरः दण्डमपि आसीत् । रामायणे राजा दण्डेन शुक्राचार्यस्य पुत्री अरजां दूषित करणं प्रसंगमस्ति । कन्यायाः इच्छाविरुद्धेन दुषितकरणस्य वर्णना दृश्यते । वलवान् नरेशः तत् भार्गव कन्यां वलपूर्वकं भूजद्वयेन आलिंग्य तां पीड़ामनुभूतेपि इतस्तत अभूत् । तथापि तस्या अनिच्छानुसारेण अरजया साकं वलपूर्वकं समागममकरोत् (७.८०.१६) एतद् पापकर्म विज्ञाय शुक्राचार्यः राजा दण्ड कवेरशाखेन शापितवान् । यथा-

एवमुक्त्वातुतांकन्यां ............................. मैथुनायोपक्रमे । (उत्तरः ७, ८०, १६)[२]

**<u>संदर्भ श्लोकाः</u>**

१. “मा निषाद प्रतिष्ठां त्वमगमशाश्वती समा

यद् क्रौञ्चमिथुनादेकमवधिः काममोहितम् ।” (वाल-२य सर्ग १५ श्लोक)[१]

२. एवमुक्त्वातुतांकन्यां दोर्भ्यांप्राप्य वलाद्वाली

विस्फुरन्तीं यथाकामं मैथुनायोपक्रमे । (उत्तर: ७, ८०, १६)[२]

दण्डस्य ......................................... भविष्यति । (उत्तर-८१, ७-१०)[१]

पापकर्माचरितवन्त: स: दुर्मति: नरेश: सप्तरात्रमध्ये पुत्रेण साकं, सेना तथा सपरिवारेण विनष्टं भविष्यन्ति । स्वल्पवुद्धि संपन्ना यज्ञ: राज्ये सर्वत्र सतयोजन व्याप्यराज्य: रजवर्णौ समस्त सचराचर प्राणिन: सप्तरात्रिं यावत् केवलं वर्षाद्वारा अदृश्यं भविष्यन्ति ।

रामायणे कन्यानां जन्मशुभं मन्यते स्म । यदा श्रीराम: रथेन आरुह्य आगच्छन्ति स्म । तस्याग्रे अन्यै व्यक्तिभि: साकं कन्यारपि प्रचलन्ति स्म ।

अक्षतं ............................................. रामस्यपुरतोययु: ।। (युद्ध:-१२८,३८)[२]

श्रीरामचन्द्रस्य अग्रे अक्षता: सुवर्णपात्र, गौ:ब्राह्मण कन्या: तथा हस्ते मिष्टान्नं धृत्वा अनेका: मनुष्या: गच्छन्ति स्म ।

अधुनापि नारीणांकृते- दुषितेसति-मृत्युदण्डादेशरस्ति वा आजीवनं कारागारेदण्डं विहितमस्ति ।

वरपात्रं चयने कन्यानां स्वातन्त्र्यता

राक्षसीन् इदं कार्यं स्वतन्त्रमासीत् यत् ता: । स्वयं पतिं वरणे सूर्पणखा श्रीरामचन्द्रं (३, १७, २४) तथा लक्ष्मणमपि (३, १८, ७) प्रस्तावमददात् ।

(चतुर्थअध्याये गान्धर्व विवाह)

कैकेसी स्वस्यवरं स्वयं वरितवती ।

(१) सात्वं मुनिवरं ...................................... वरयस्वयम् । (उत्तर-९, ११)[३]

**<u>संदर्भ श्लोका:</u>**

१. दण्डस्य विषयो यावत् तावत् सर्व समुश्चयम्

पांसु वर्षमिवालक्ष्यं सप्तरात्र भविष्यति । (उत्तर-८१, ७-१०)[१]

२. अक्षतं जातरूपं च गाव: कन्या: सहद्विजा: ।

नरा मोदकहस्ताश्च रामस्यपुरतोययु: ।। (युद्ध:-१२८,३८)[२]

३. सात्वं मुनिवरं श्रेष्ठं प्रजापति कुलोद्भवम् ।

भजविश्ववसं पुत्रि पौलस्त्यं वरयस्वयम् । (उत्तर-९, ११)[३]

दुहिते! त्वं प्रजापतेः कुले जातं श्रेष्ठगुणंसंपन्नं पुलस्त्यनन्दनं मुनिवरं विश्रवायाः स्वयं गत्वा पतिरूपेण वरणं कुरु तथा तस्य सेवां कुरु ।

(२) स्वयंवरः- अर्थात् स्वयं स्वस्य वरपात्रं निर्णयं करणम् । परन्तु वरपात्रं विचिन्वने तस्याः पिता किंचित् सर्त्तंस्थापयति । यत् पुराणेन वरमाल्यं कन्या दत्त्वा तं चुनोति । पश्चात् विवाहं भवति स्म ।

सीतास्वयंवरः- सीतायाः विवाहार्थं यत् स्वयंवर पद्धतिमासीत् । तस्य पिता जनकः यः स्वस्य पराक्रमेण शिवदत्तां धनुःगुणम् उत्तोल्य तथा तत्धनुः त्रोटयिष्यति । सः सीतां विवाहं करिष्यति (१, ६६, १६), (१, ६६, १८) विविधात् देशात् राजकुमारागतवन्तः परन्तु रामेण धनुः आकर्षणेन त्रोटितम् । (१-६.१७) तदनु सीता रामस्य गले मालां दत्त्वाबरितवती ।
आरोपयित्वा मौर्वी च पूरयामासतद्धनुः

तद्वभंज धनुर्मध्ये नरश्रेष्ठो महायशाः । (वाल-६७तम सर्ग-१७)[१]

रजोदर्शनादनन्तरं सीतायाः अनुजारपि युवत्यशासन् । विवाहादनन्तरं रेमिरे मुदिताः सर्वा भत्तुर्भिमुदितरसः (१, ७७, १४) अयोध्यां प्राप्तानन्तरं तस्याः पत्यासह एकान्तेन स्थित्वा सानन्देन समयं ब्ययितमकरोत् ।

विवाहसमये सीतायाः मत् यद्दुपदेशान् दत्तवती, (२, ११८, २, २, २७, १०, २, २९, २७) तानि एका युवावस्थां प्राप्तामेव वोधयिष्यति । अतः स्पष्टं सीतायाः बाल्यविवाहं नासीत् ।

रामायणे अन्याशांमपि विवाह चर्चाभवति परन्तु तत्र वाल्यविवाह प्रथा नैवसीत् ।

वायुदेवः कुशनाभस्य १०० पुत्रिणां विवाह प्रस्तावं कृतवान् । परन्तु सः प्रस्तावमस्वीकारं कृतवान् । वा स्वीकारस्य प्रश्नं नागतवान् । रामायणे (१, ३३, २५) कुशनाभ तस्य १०० पुत्रीन् ब्रह्मदत्ताय अददात् । परन्तु विदावेलायामवसरेषु दानं नाददात् ।

इत्थं रावण मन्दोदरर्याः विवाहं (७, १२, २०) सूर्पणखा विद्ज्जिह्वायाः विवाह (७, १२, २) कुम्भकर्णम् एवं वज्रज्वालायाः विवाहान् (७, १२, २२, १/२) तथा विभीषण एवं सरमायाःविवाहेषु उपहाराणि दानं न उल्लिखितम् अस्ति । राक्षसानां मध्येऽपि यौतुक उपहारप्रथा नासीत् ।

अधुनातु यौतुकं प्रथा उत्कटमस्ति । कुत्रापि वधुं यौतुकं नानीतं चेत् मारयन्ति च । अग्नौ दग्धिभूतं कुर्वन्ति च । नियमानिऽपि मृत्युदन्डमस्ति परन्तु तदापि धनप्रलुब्याः दुष्कर्मं कुर्वन्ति ।

**संदर्भ श्लोकाः**

१. आरोपयित्वा मौर्वी च पूरयामासतद्धनुः

तद्वभंज धनुर्मध्ये नरश्रेष्ठो महायशा: । (वाल-६७तम सर्ग-१७)[१]

कन्यादानं पिताद्वाराऽपि भवति स्म-

रामायणकालीन समाजेन यदा विवाहस्य योगय: भवति स्म, पिता कन्या दानाय चिन्तितंभवति स्म । सीताया: भगिनीनां कन्यादानं स्वस्यपिताजनकेन संपन्नम् कृतम् । दे-४ अध्याय विवाह संस्कारस्य वर्णनं पृ-४६-५०)

कुशनाभ: वायुदेवं स्वस्य १०० कन्यान् न दत्त्वा ब्रह्मदत्ताय शतकन्या: प्रदत्तवान् । राजर्षि तृणविन्दु: पुलस्यं स्वस्या पुत्री: दत्तवान् । विश्रवाऋषे: उत्तममाचरणेन प्रसन्नोभूत्वा भरद्वाज: स्वस्य कन्यादानं कृतंस्यात् । (७, ३, ३) वेदवती च रावणर्या: कथोपकथनेन ज्ञायते यद् तस्या: पिता तस्या: दानकर्त्तुम् इच्छति स्म । रावणय स्वस्य परिचयं दत्त्वा वदति ।

शम्भुनाम .................................. हिंसित: । (उत्तर-१७, १० १/२-१४)[१]

क्रोधेनहि पिता मेरसौ त्रैलोक्यमपिनिर्दहेत् ।

दास्येते चानवपाङ्गं तव मायाचित: पिता । (उत्तर-८०, १०-१२)[२]

भो ममपिता महातपस्वी अस्ति । यदि तम अभिकृध्यति तव विपत्ति: भवेत् । स्वेच्छाचारेण भवान् मांप्राप्तुं न शकनोति । अत: भोसुन्दर राजन् ! भवान् यदि याचनां करोति तदा पितरं मां भवते दास्यति । वलत्कारेण नहि राक्षस सुमालिना कैकसीं विश्रवाय अददात् । (७, ९, ६) इत्थं राक्षसेन मयेन पुत्री मन्दोदरी रावणाय दत्ता ।

इयं ममात्मजाराजन् ................................ प्रतिगृह्यताम् । (उत्तर-१२, १८, १/२)[३]

भो राजन् । इयं मम दुहिता, या हेमया श्वस्या गर्भेण धारिता ।

**<u>संदर्भ श्लोका:</u>**

१. शम्भुनाम ततोराजा दैत्यानां कुपितोऽभवत् ।

तेन रात्रौ शयानो मे पितापापेन हिंसित: । (उत्तर-१७, १० १/२-१४)[१]

२. क्रोधेनहि पिता मेरसौ त्रैलोक्यमपिनिर्दहेत् ।

दास्येते चानवपाङ्गं तव मायाचित: पिता । (उत्तर-८०, १०-१२)[२]

३. इयं ममात्मजाराजन् हेमयाप्सरसाधृत ।

कन्या मन्दोदरीनाम पत्न्यर्थं प्रतिगृह्यताम् । (उत्तर-१२, १८, १/२)[३]

**कन्यादानं भ्रात्रापि**

यदि पिता नास्तिचेत् ज्येष्ठभ्राता भगिनीं ददाति । रामायणे रावणः अस्य ज्वलन्तमुदाहरणमस्ति । सः स्वस्य भगिनि सुर्पणखायाः विवाहं कारयति स्म । अगस्त्य ऋषि श्रीरामं विषयेस्मिन् इत्थमवादित् ।

स्वसारं ........................................ राक्षसः ॥ (उत्तर-१२, १-२)[१]

स्वस्याभिषेके सति राक्षसभ्रातरैः साकं लंकापूर्य्यांमुषितवान् । तदा स्वस्य भगिनि राक्षसी सूर्पणखायाः विवाहस्यचिन्ता अभवत् । असौ राक्षसेन दानव राज विछुत्ज्जिह्वां यः कालकायाः पुत्रासीत् । स्वकीयः भगिनी सूर्पणखां विवाह दत्तवान् ।

**कन्यादानं माताद्वारा**

कदाचित् इत्थमभवत् यत् कन्यायाः पिता च भ्रातारं विना रामायणे सन्ध्या नामा राक्षसी स्वस्याः पुत्र्याः बिच्युतकैशाय विवाहं दत्तवती । (७, ४, २१)

विवाहस्य (विच्छदं) परित्यागम्

विवाहस्य संम्बन्धः दौआत्मानै कि मिलनम् । तथापि रामायणे विवाह विच्छेदं दृश्यते । अपवाद स्वरूपं कैकेयी च तस्याः माता विषये द्वे उदाहरणे प्राप्येते । यत्र तासां स्वार्थाय स्वेस्यां पतिभ्यां विच्छेदमभवताम् । दशरथेन दत्तं वरद्वयं कैकेयी तस्याः स्वार्थाय एव याचितवती । ततः दशरथः तस्याः विच्छेदाय निश्चयं कृतवान् ।

यस्ते मन्त्रकृतः .................................... सहत्वया । (अयो- १४, १४)[२]

पापिनि! अहमग्निंसमीपं वैदिक मन्त्रं प्रपठ्य तव यदहस्तं सम्मिलितं कृतवान् तद्धशां त्यक्तवान् ।

उत्तराकान्डे श्रीरामचन्द्रः लोकभयात् सीतां परित्यक्तवान् । परन्तु सः कदापि द्वितीय विवाहं न कृतवान् । अश्वमेधयज्ञ समये स्वर्णसीतां विनिर्माय पत्न्योनामकरणं कृत्वा यज्ञ संपादनं करोति स्म । (७, ६१, २५) श्रीरामेण वाल्मीकेःपुरः कथितम्-

**संदर्भ श्लोकाः**

१. स्वसारं कालकेयाय दानवेन्द्राय राक्षसीम् ।

ददौ शुर्पणखां नाम बिछुज्जिह्वाय राक्षसः ॥ (उत्तर-१२, १-२)[१]

२. यस्ते मन्त्रकृतः पाणिरग्नौपापेमयाधृतः

संत्यजामि स्वजंचैव तवपुत्रं सहत्वया । (अयो- १४, १४)[२]

लोकापवादो .................................... क्षन्तुमर्हति । (उत्तरा-१७:४)[१]

**विवाहस्य प्रकाराः**

रामायणे ब्राह्म, प्राजापत्य, असुरः, गान्धर्वः, राक्षसः तथा पैशाचः विवाहानां चर्चा कृता ।

**विवाह संस्कारः**

षोडशः संस्कारः मध्येएकः । शुभसमयम्, अग्निसंस्थापनम्, कन्यादानम्, पाणिग्रहणम्, अग्निप्रदक्षिणा, वैवाहिक सभामण्डपस्य वर्णनमत्यन्त सूचारुरुपेण कृतवान् ।

**पतिव्रतानारी सीता**

शमामनादाय ...................................... गछराममहासह ।। (अयो-३०, १०-१८)[२]

भवान् मामनीत्व वनं गन्तुं न शक्यते । यदि तपस्यांचरणं कृतंस्यात्, वनंयदि यदिवा स्वर्गं गमनं कुर्यात् भवता साकमहं गन्तुं शक्नोमि । भवता सार्द्धं यत्र कुत्रापि गमनं भवेत् अहं गन्तुं शक्नोमि । यदिवा नरकं भवेत् तदापि अहं गन्तुमिच्छामि मम इदं संकल्पं ज्ञात्वा भवान् प्रसन्नेन सह वनं गच्छेत् ।

**संदर्भ श्लोकाः**

१. लोकापवादो वलवान् येन त्यवताहिमैथिली ।

सेयं लोकभयात् ब्रह्मन्नपापेत्यभिजानता ।

परित्यिक्ता मयासीता तद् भवान् क्षन्तुमर्हति । (उत्तरा-१७:४)[१]

२. शमामनादाय वनं नत्वं प्रस्तितुमर्हसि ।

तपोवायदिवारण्यं स्वर्गो वास्थावास्यातत्वया सह ।।

यस्त्वाया सह स स्वर्गो निरयो यस्वयाविन ।

इतिजानन् पशं प्रोतिं गछराममहासह ।। (अयो-३०, १०-१८)[२]

स्त्री तस्याः पतिः विना जीवितुंनैच्छति रामेणसाकं वनं गमनाय इच्छुकी सीता कथयति- पतिहीना तु या नारी न शक्ष्यतिजीवितुम् । (२, २९, ७)

सीता दृढ़ता पूर्वकमवादीत्-

यदिमां ......................................... मृत्युकारणात् । (अयो-२९,२१)[१]

यदि भवान् दु:खितां मां व नं नेतुं नैच्छति तदाहं मृत्येर्थं विषं भुंजामि । अग्निमध्ये मां प्रक्षिपामि अथवा जले लीनं भविष्यामि । रावणस्य हरणं पश्चात् हनुमता प्रेषितमुदन्तेन सीतावदति- असहयानि चदु:खानि वाचश्च हृदयछिदः । राक्षसः सह सवासं त्वत्कृते मर्षयाम्यहम् । (सुन्दर- ४०-९)

पतिः नितरां मन्दं भवेत्चेत् स्त्रीयः सः देवतुल्यं भवति । इत्थं वदन् दशरथः क्षमायाचना कुर्वन् दशरथः स्वस्यापराधारा क्षमायाचना कुर्वन् अवादित्-

भर्त्तातु ........................................... दैवितम् । (अयो- ६२-८)[२]

देवी पति गुणवानहो अथवा गुणहीनं धर्मस्य विचारं कृतवत्यः सतीनारीणां कृते प्रतक्षं देवता । पतिब्रता स्त्रीणां पतिरेव सर्वस्वम् । पतिद्वारा त्यागीभवतेस्त्री सीता श्रीरामं स्वस्याः देवता, वंधु, गुरु, मान्या मान अवादीत्–

पतिर्हि ..................................... कार्य विशेषतः । (उत्तरा-४८, १७, १८)[३]

प्रेषितभर्त्तुका- यदि पत्न्याः पति विच्छेदेन कार्यवशतः वा दूरे स्थास्यतिचेत् सा प्रोषितभर्त्तृका उच्यते ।

वनगमनात् प्राक् रामेण उक्तं यत्-

याते च ........................................... त्वयानघे । (अयो- २६,२९)[४]

**<u>संदर्भ श्लोकाः</u>**

१. यदिमां दु:खितामेव वनंनेतुं नचेच्छसि ।
विषमाग्निं जलं वाहमास्थास्यै मृत्युकारणात् । (अयो-२९,२१)[१]

२. भर्त्तातु खलुनारीणां गुणवान् निगुणोऽपिवा
धर्म विमृशमाननां प्रत्यक्षं देवी दैवितम् । (अयो- ६२-८)[२]

३. पतिर्हि देवतानार्याः पतिवन्धुः पतिगुरुः
प्राणेरपि प्रियं तस्मात् भर्त्तुः कार्य विशेषतः । (उत्तरा-४८, १७, १८)[३]

४. याते च मयिकल्याणी वनं मुनिमिषर्बितम् ।
ब्रतपोवासपरयाभवितव्यं त्वयानघे । (अयो- २६,२९)[४]

कल्याणी निष्पापसीते! मुनिजन सेवित वनं गमनात् परं त्वं व्रतोपवासादिषु संगलग्नं भवेः ।

श्रीरामं ...................................... तपोधनाम् ॥ (सुन्दरः- १९, १९-२२)[१]

विना प्रयत्नेन एकेन वेणीना सीतायाः इदृशी शोभा भवति स्म यथा वर्षावगमने सुन्दरं प्रसारी हरितं वनश्रेणिन । पृथ्वी सुशोभिता भवति स्म । सा उपवासेन, भर्यनक्षीणा कृशकाय तथा दीनमाभवत् आहारं वहुस्वल्पमभवत् । एकमात्रं तपः एव तस्याः धनमासीत् । सादुः खेनातुरंभूत्वा कुलदेवं नमस्कृत्य मनसा एव प्रार्थयति स्म श्रीरामस्य हस्तेन दशमुखस्य पराजयं भयतु ।

यदा सा रसातलं प्रवेशात् प्राक्

राघवादन्यं ...................................... दातुमर्हति । (उत्तर- १७, १४)[२]

अहं राघवादन्य पुरुषं मनसापिचिन्तनं न करोमि । यदिहसत्यं तर्हि भगवती देवी मां स्व क्रोडे स्थानं ददातु ।

भासेनकृतं स्वप्नं वासवदत्तं नाटकेऽपि वासवदत्ता प्रोषितभर्त्तृकासीति परिव्राजकः योगान्धरायणः पद्मावतीं कथयति यत् इयं मे स्वसा प्रोषितभर्त्तृका तस्य स्वामी विदेशगस्ते नास्ति । भवति इमां न्यासरुपेण किञ्चित् कालं परिपालयत् । सः आगमनादनान्तरं नेष्यामिति ।

कौशल्या ......................................... वज्रपाणिना । (बाल- १८:१२)[३]

**संदर्भ श्लोकाः**

१. श्रीरामं विना दीर्घया वेण्या शोभमानामयत्मतः

नीलया नीरदापाये वनराज्ञा महीमिव ।

उपवासेन शोकेन ध्यानेन च भयेन च

परिक्षीणां कृशां दीनंमल्पाहारां तपोधनाम् ॥ (सुन्दरः- १९, १९-२२)[१]

२. यदा सा रसातलं प्रवेशात् प्राक्

राघवादन्यं मनसापि नचिन्तये

तथामे मध्यवीदेववी विवरं दातुमर्हति । (उत्तर- १७, १४)[२]

३. कौशल्या शुशुभे तेन पुत्रेणामिततेजसा

यथावरेण देवानामदिति वज्रपाणिना । (बाल- १८:१२)[३]

असौ अमीत तेजस्वी पुत्रेण महाराणी कौशल्याः वृहती शभा अभवत् । यथा श्रेष्ठवज्रपाणि इन्द्रं देवमाता अदिति सुशोभिता अभवत् ।

उत्तमंपुत्रं प्राप्तये मातरमतीव पवित्रं स्थातुमावश्यकम् । विषयेस्मिन् शुचिर्यदि भविष्यति पूर्णवषै सहस्रेषु तुसुचि यदि भविष्यसि पुत्रं त्रैलोक्य हन्तारं यतस्त्वं जनयिस्यसि (वाल- ४६-८)

यदि संपूर्णएकसहस्त्रवर्षं यावत् पवित्रतापूर्वकं स्थास्यति, तदा मत्त् त्रिलोकनाथेन्द्रस्य वधकारकं समर्थो पुत्रं प्राप्तुं शक्यते ।

## माता

### श्नेहेषुमाता

१. वात्सल्यप्रेम- माता सन्तानेन साकं या स्नेहभावं प्रकटयति ता अनन्या । सा स्वस्य सन्तानस्य कृते स्वजीवनमपि दातुं शक्यते । कौशल्या स्वस्य पुत्राय वारंवांरम् उपवासं तथा देवतानामपि ध्यानं करोति स्म । (२.२०.४८) सा प्रतिदिनं भगवान् विष्णाआराधनां करोति स्म । येन स्व पुत्रः युवराजं भवेत् । अमाधं ब्रतये क्षान्तं पुरुषे पुष्करेक्षणे । येयमिक्ष्वाकु राजश्रीः पुत्रत्व संश्रयिष्यति । (अयो-४.४१)

वहुहर्षस्य विषयं यन्मया भगवान् विष्णुः प्रसन्नतायै व्रत उपासना कृताजीत् तदय संपूर्णमभवत् । तस्मात् अस्माकमिक्ष्वाकु कुलस्य कुललक्ष्मी तुभ्यं प्राप्तं स्यात् ।

यदा भरतः तस्याः पुरः शपथं कृत्वा अवादीत् सः निर्दोषः सिद्धिंकरोति तदा सा भरतमपि आशीर्वचने अवदत्- दिष्टया नचलितो धर्मादात्माते सहलक्षणे । वत्से ! सत्य प्रतिज्ञो सतांलोकोनुवा पस्यसि । (अयो- ७५, ६२)

यदा श्रीरामचन्द्रः वनंप्रतिगन्तुमुदयतमभवत् तदा कौशल्या तंमवदत् । सा श्रीरामंविना जीविता न भवेत । (२, २१, २६/२७) यदा रथोपरि श्रीरामः सीता च लक्ष्मणमारोहणाः अकुर्वन् तदा माता कौशल्या धावती आगच्छति-

प्रत्यगार मिवावान्ती सवत्सा वत्सकारणात् ।

वद्धवत्सा यथा धेनु राममाताभ्यधावत् ।

तथा रुदन्तीं कौशल्यां रथं तमनु धावतीम् ।

क्रोशन्तीं राम रामेति हासीतेलक्ष्मणेतिच ।

रामलक्ष्मणसीतार्थं स्त्रवन्ती वनैत्राजम् ।

असकृत् प्रैक्षत् सतां नृत्यन्ती मिवमौतरम् । (अयो- ४०, ४३-४५)

यथा वन्धिता वत्सा गौः सायंकाले गृहंप्रति प्रत्यावर्त्तनंकाले वत्सायाः स्नेहेन तथा श्रीरामस्य माता कौशल्यांप्रति धावति स्म । हा रामः हा राम, हासी तेहा लक्ष्मणः इति शब्दं कृत्वा क्रन्तती माताकौशल्या तथा रथं पश्चात् धावति स्म । सा श्रीराम-लक्ष्मण-सतयार्थं नेत्रात् अशु स्त्रवती स्म, तथा इत्थं चक्राकारेण भ्रमत् माता कौशल्यां श्रीरामः मुहुः पश्यति स्म ।

**पत्न्याः यज्ञाधिकारः**

पत्नींविना यज्ञानुष्ठानं संपूर्णं न भवति । अतः सा पुरुषस्यार्द्धांगिनी उच्यते । रामायणे पत्नीं वहवः यज्ञसंबन्धी अधिकारमासीत् । राज्याभिषेकं तथा श्रद्धादि धार्मिक यज्ञानुष्ठानः दंपति मिलित्वा संपन्नं कुर्वन्ति स्म । रामायणे रामः सर्वं धर्मानुष्ठानं स्वकीया धर्मपत्न्या साकं कुर्वन्ति स्म ।

वशिष्ठेनापि श्रीरामचन्द्रः वधुसीता उपवासः क्त्तुमादिदेश । प्रसन्नस्ते पितारामयत्वं राज्यावापस्थति । उपवासं भवानदप करोतु सहसीतया । (अयो- ५, ९)
राम ! तवपिता तुभ्यं वहुप्रसन्नं अस्ति, त्वं राज्यप्राप्तं कुरु । अतः अद्य त्वं सीतयासाकमुपवासं करोतु । श्राद्धसमये अपि पत्निपत्या सार्द्धं विधिसंपन्नं करोति । पितुः मृत्यु समाचारं श्रुत्वा तस्मिन् समये लक्ष्मणंप्रति इत्थमवदत् ।
सीतापुरस्तात् ................................... सुदारुणा । (अयो- १०३, २१)[१]

सीता अग्रे गच्छति स्म । तदनु त्वं गच्छ । अहं त्व मनुगच्छामि । शोकाकुल समये अत्यन्तं दारुण गतिर्भवति । अश्वमेध यज्ञोऽपि अनुष्ठानमपि दंपती मिलित्वा कुर्वन्ति स्म । इत्थं यज्ञस्य प्रारम्भेण दशरथ स्वस्य तिसृभिः पत्न्यैः साकं यज्ञस्यदीक्षां नितवान् । (१, १३, ४१)

इयं प्रातकालस्य संध्यास्ति । अस्मिन् मननियोगार्थं जानकी संध्याकालिक उपासनार्थं पूण्यसलिला नदी तटमवश्यम आगमिष्यति ।

**पत्न्याः साम्प्रतिकि अधिकारः**

रामायणकालीन समाजे स्त्रीणां धनसंपत्तिनामधिकारं नासीत् । परन्तु अधुना वर्त्तते ।

**संदर्भ श्लोकाः**

२. सीतापुरस्तात् ब्रजतुत्वमेनामभितोब्रज ।

अहंपश्चात् गमिष्यामि गतिर्ह्येणा सुदारुणा । (अयो- १०३, २१)[१]

**स्त्रीशिक्षा**

रामायणकालीन समाजे स्त्रियः विद्या रहितांनासन् । विवाहात् प्रागेव धार्मिकी शिक्षादीयते स्म । तत्र वैदिक मन्त्राणामुच्चारणस्यज्ञानमासीत् । कौशल्या पतिंविनाऽपि मन्त्रोच्चारणपूर्वकाग्नौ आहुति प्रदानं करोति स्म । (२,२०, १५) सा अग्निहोत्रमपि अकरोत् (२, २४, २८) सा माता श्रीरामं वनं प्रेषणात् प्राक् विधिपूर्वं स्वस्तिवाचन मकरोत् । (२, २५, ४६)

कौशल्यां लौकिक श्रुतेरपि ज्ञानमासीत् । स्वस्यपुत्रं इंगुदी फलानि चूर्णिते सती पिन्डदानं करणेदृष्ट्वा अवादीत् । श्रुति खल्वियं सत्या लौकिकी प्रतिभातिन । यदन्नः पुरुषो भवति तदन्नास्तस्यदेवताः । (अयो- १०४.१५)

इलौकिकिश्रुतिः नूनं मां सत्यप्रतीतं भवति यत् मनुष्यः स्वयं यदन्नं खादत्ति तस्य देवताऽपि तदन्नमेव ग्रहणं करोति ।

**संदर्भ ग्रन्थसूचिः**

१. महर्षि बाल्मीकि प्रणित श्रीवाल्मीकिय रामायण, गीताप्रेस्, गोरखपुर ।

२. श्रीमद् बाल्मीकीय रामायणम् (मूलमात्रम्), गीताप्रेस्, गोरखपुर ।

३. रामायणकालीन नारी (एक अनुशीलनम्), डा. श्रीमती स्कालस्टिका कुजूर, मुद्रक आर्.के. प्रींट् सार्विसेस्, दिल्ली ।